यम् । तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः । दीयते ज्ञानसंभारः क्षालनात् पापसन्ततेः । ततो दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः" । सर्वाश्रमेषु दीक्षाया आवश्यकत्वम् तथा च "दीक्षामूलं जपं सर्वं दीक्षामूलं परन्तपः । दीक्षामाश्रित्य निवसेत् यत्र कुत्राश्रमे वसन्" । शूद्रस्य निषेधमाह तन्त्रान्तरे "प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्वथा । आत्ममन्त्रं गुरोर्मन्त्रं मन्त्रञ्चाजपसंज्ञकम् । स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्द्विजः । शूद्रो निरयमाप्नोति ब्राह्मणो यात्यधोगतिम्" । नृसिंहतापनीये "सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यद्विजानीयात् स मृतोऽधोगच्छति" । लक्ष्मीं लक्ष्मीमन्त्रम् । विशेषमाह वाराहीतन्त्रे "गोपालस्य मनुर्देयो महेशस्यापि पादजे । तत् पत्न्याश्चापि सूर्यस्य गणेशस्य मनुस्तथा" ।

अदीक्षितस्य निन्दामाह तन्त्रसारे

"अदीक्षिता ये कुर्वन्ति जपपूजादिकाः क्रियाः । न भवन्ति प्रिये तेषां शिलायामुप्तबीजवत् । देवि ! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः । तस्मात् सर्वप्रयत्नेन गुरुणा दीक्षितो भवेत् । अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत् । तस्माद्दीक्षां प्रयत्नेन सदा कुर्य्याच्च तान्त्रिकात् । कल्पे दृष्ट्वा तु मन्त्रं वै यो गृह्णाति नराधमः । मन्वन्तरसहस्रेषु निष्कृतिर्नैव जायते । नादीक्षितस्य कार्य्यं स्यात् तपोभिर्नियमव्रतैः । न तीर्थगमनेनापि न च शारीरयन्त्रणैः" । अतः सद्गुरोराहितदीक्षः सर्वकर्माणि साधयेत् । गोविन्दवृन्दावने "अदीक्षितस्य मरणे प्रेतत्वं न विमुञ्चति" । नवरत्नेश्वरः "सर्वासामपि दीक्षाणां मुक्तिः फलमखण्डितम् । अविरोधाद्भवन्त्येव प्रासङ्गिक्यस्तु भुक्तयः" । दीक्षा काम्या च यथा कुलार्णवे "उपपातकलक्षाणि महापातककोटयः । क्षणाद्दहति देवेशि ! दीक्षा हि विधिना कृता । दीक्षाङ्गागमोक्तागमपदार्थमाह गामले "आगतः शिववक्त्रेभ्यो गतश्च गिरिजानने । मतस्तस्या हृदम्भोजे तस्मादागम उच्यते । आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः । न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः । पञ्चवर्णैर्भवेद्दीक्षा ह्यागमोक्तैः शृणु प्रिये ! । यां कृत्वा कलिकाले च सर्वाभीष्टं लभेन्नरः" तन्त्रसा०

दीक्षाप्रकारस्तु कलावतीशब्दे १७८२ पृ० द्रष्टव्यः ।

अन्यत्र च दीक्षाशब्दव्युत्पत्त्यादिकमुक्तं यथा

रुद्रयामले "ददाति शिवतादात्म्यं क्षिणोति च मलत्रयम् । अतो दीक्षेति संप्रोक्ता दीक्षातन्त्रार्थवेदिभिः" । लघुकल्पसूत्रे च "दीयते परमं ज्ञानं क्षीयते पापपद्धतिः । तेन दीक्षोच्यते तन्त्रे आगमार्थसत्त्वात्" । योगिनीतन्त्रे तृतीयभागे षष्ठपटलेऽपि "दीयते ज्ञानमत्यर्थं क्षीयते पाशबन्धनम् । अतो दीक्षेति देवेशि ! कथिता तत्त्वचिन्तकैः । मनसा कर्मणा वाचा यत् पापं समुपार्जितम् । तेषां विश्लेषकरणी परमज्ञानदा यतः । तस्माद्दीक्षेति लोकेऽस्मिन् गीयते शास्त्रवेदकैः । विज्ञानफलदा सैव द्वितीया क्षयकारिणी । तृतीया मुक्तिदा चैव तस्माद्दीक्षेति गीयते" । विश्वसारतन्त्रे द्वितीयपटले च "अथ दीक्षां प्रवक्ष्यामि शृणुष्व कमलानने ! । यस्य विज्ञानमात्रेण देवत्वं लभते नरः । दिव्यज्ञानं यतो दद्यात् कुर्यात्पापक्षयं यतः । तस्माद्दीक्षेति सा प्रोक्ता सर्वतन्त्रस्य सम्मता" । अथ दीक्षामाहात्म्यम् रुद्रयामले पूर्वखण्डे तृतीयपटले "देवि ! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः । तस्मात् सर्वप्रयत्नेन गुरुणा दीक्षितो भवेत् । अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत् । तस्माद्दीक्षां प्रयत्नेन सदा कुर्य्याच्च तान्त्रिकीम्" पञ्चदशपटले "अदीक्षिता ये कुर्वन्ति जपपूजादिकाः क्रियाः । न भवन्ति प्रिये ! तेषां शिलायामुप्तबीजवत्" कल्पसूत्रटीकाधृतकुलार्णवतन्त्रे "रसेन्द्रेण यथा विद्धमयः सुवर्णतां व्रजेत् । दीक्षाविद्धस्तथैवात्मा शिवत्वं लभते प्रिये ! दीक्षाग्निदग्धकर्मासौ पाशाद्विच्छिन्नबन्धनः । गतस्तस्य कर्मबन्धो निर्जीवश्च शिवो भवेत् । गतं शूद्रस्य शूद्रत्वं विप्रस्यापि च विप्रता । दीक्षासंस्कारसंभिन्ने जातिभेदो न विद्यते । शिवलिङ्गे शिलाबुद्धिं कुर्वन् यत् पापमाप्नुयात् । दीक्षितस्यापि पूर्वत्वं स्मरन् तत् पापमाप्नुयात् । दार्वश्मलौहरत्नजातिलिङ्गं प्रतिष्ठितम् । यथोच्यते तथा शुद्धाः सर्वे वर्णाश्च दीक्षिताः । येन पूजितमात्रेण चाब्रह्मभुवनान्तकम् । पूजितं तेन सर्वं स्याद्दीक्षितेन न संशयः । नादीक्षितस्य कार्य्यं स्यात्तपोभिर्नियमव्रतैः । न तीर्थगमनेनापि न च शारीरयन्त्रणैः" । पञ्चमखण्डे षष्ठोल्लासेऽपि "गवां सर्पिः शरीरस्थं न करोत्यात्मपोषणम् । स्वकर्म रचितं दत्तं पुनस्तामेव पोषयेत् । एवं सर्वशरीरस्थं सर्पिर्वत् परमेश्वरी । विना चोपासनाद्देवि ! न ददाति फलं नृणाम्" । पुरश्चरणरसोल्लासे प्रथमपटले "न च दीक्षा-